# भवभूते वैंशिष्ट्यम्

**धर्मेश डी. रावल**
**बडौदा-संस्कृतमहाविद्यालयः**

संस्कृतसाहित्ये अनेके कवयः अभूवन् । तत्र भवभूतेः नामधेयम् उल्लेखनीय अस्ति । अयं कविः महान् नाटककारः कविश्च आसीत् । अस्य जन्म वरारनामके नगरे आसीत् तत्रत्यः भवभूतिः निवासी आसीत् । भवभूतिः उदुम्बरवंशीयो ब्राह्मणः आसीत् ।

वंशविषये इदमेव प्राप्यते यत् अस्य महाकवेः पितामहस्य नाम भट्टगोपालः आसीत् । पितुः नाम नीलकंठ, मातुश्च नाम जातुकर्णी आसीत् । अस्य उपनाम श्रीकण्ठः आसीत् इति विद्वद्भिः मन्यते ।

**भवभूतेः स्थितिकालः**

भवभूतेः स्थितिकालः उत्तरसीमा ८०० इ. अनन्तरं न आसीत् । आचार्यमम्मटेन, आचार्यमहिमभट्टेन तथा च आचार्यक्षेमेन्द्रेन स्वकीयासु रचनासु काव्यप्रकाशे, व्यतिरेकविचारचर्चायाम् एवंच औचित्यसिद्धान्ते ११०० ई. लिख्यते । तथा च स्वकीयासु रचनासु भवभूतिरचनारभ्यः उदाहरणानि दत्तानि सन्ति ।

भवभूतिना केवलं त्रीणि नाटकानि एव विरचितानि । १. महावीरचरितम् २. उत्तररामचरितम् तथा ३. मालतीमाधवम् च। भवभूतिना त्रिषु नाटकेषु महावीरचरितं नाट्यकलायाः दृष्ट्याः सफलं न प्रतीयते । एवमेव द्वितीयप्रकरणम् मालतीमाधवम् अपि अस्ति । किन्तु महावीरचरितापेक्षया नाट्यकलायाः कश्चन् विकासो तत्र दृष्टिगोचरो भवति । उत्तररामचरितम् अवश्यम एव तस्य नाटकद्वयस्य अपेक्षया अधिकम् उत्कृष्ट नाटकम् अस्ति । उत्तररामचरितम् कवित्वदृष्ट्या उत्कृष्टं अस्ति । नाट्यकलादृष्ट्याऽपि तावदेव उत्कृष्टम् । उत्तररामचरिते सीतारामदीनां पात्राणां चरित्र - चित्रण दृष्ट्या सफलं कथयितुं शक्यते । उत्तररामचरिते सप्ताङ्काः सन्ति । महावीरचरितेऽपि च सप्ताङ्का एव सन्ति । तथा च मालतीमाधवम् १० अंकस्य प्रकरणं अस्ति ।

भवभूतेर्महावीरचरितम् मालतीमाधवम्, उत्तररामचरितं चेति रूपकत्रयं उपलभ्यते । अस्मिन् नाटकत्रये महावीरचरितं भवभूतेः प्रथमं नाटकम् अस्ति । यथा वाल्मीकिरामायणे

अधिकारिकरूपेण उल्लेखः प्राप्यते यत् रामजन्मतः रामाज्यभिषेकपर्यन्ता कथा वर्णिता अस्ति। तत्रैव मालतीमाधवे-उभयोः मालती-माधवयोः यत् कथानकं वर्तते तत् कल्पनाप्रसूता प्रणयगाथा वर्णिता अस्ति । यत्र राज्याभिषेकोपरान्ते कथानकं तदेव अनेन कविना अस्मिन् नाटके वर्णित इति । इदं नाटकं भवभूतेः उत्कृष्टतमं नाटकम् अस्ति ।

भवभूतेः कवित्वं अतीव उत्कृष्टं वर्तते । तस्य उत्तररामचरितं तु कवित्वस्य दृष्ट्या अतीव अपूर्वम विद्यते । अस्मिन् नाटके काव्य कलायाः सुन्दरं निदर्शनम् अस्ति । भवभूतेः कवित्वस्य मुख्यं वैशिष्टयम् इदं वर्तते यत् तत्र भावपक्षस्य प्राधान्यम् अस्ति । भवभूतिना विभिन्नानां रसानां भावानां च रसाभिव्यक्तिः प्रस्तुता अस्ति । अस्मिन विषये सः पूर्णतया सफलो वर्तते । भवभूतिना मानवीयानां, भवानां विश्लेषणे मार्मिके चित्रणे च अतीव दक्षोऽस्ति । यद्यपि भवभूतिना स्वग्रन्थेषु विभिन्नानां रसानां अभिव्यक्तिः अपि साफल्येन कृता वर्तते । वस्तुतः भवभूतिः करुणरसस्य सम्राट अस्ति । करुणरसस्यसम्बन्धिना चाभिव्यञ्जने तु स्वकीयम् अभूतपूर्वं नैपुण्यं प्रकटितम् अस्ति ।

उत्तररामचरिते स्वयमेव कविना घोषितं यत् ---

**एको रसः करुण एवं निमित्तभेदादिभिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।**
**आवर्तबृदबृदतरङ्गमयान् विकारन्भो यथा सलिलमेवतु तत्समग्रम् ।३/४७**

भवभूतिना उत्तरामचरितस्य तृतीयाङ्कस्य प्रारम्भे सीतावियोगजन्यदीर्घशोकसन्तापेन रामस्य दशा एतादृशी जाता अस्ति । यत--

**अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।**
**पुटपाकप्रतीशो रामस्य करुणो रसः ।।३/१)**

भवभूतिना अस्मिन् नाटके विभिन्नेषु स्थलेषु करूणरसस्य प्रभावोत्पादिका व्यथा वर्तते । वस्तुतः भवभूतिः करूणरसस्य आचार्य एव वर्तते ।

भवभूतिना अपूर्वं चित्रणमपि स्वग्रन्थेषु कृतं वर्तते । उत्तरामचरिते ग्रन्थे प्रकृत्यादीनां सर्वेषां पदार्थोनां सर्वेषां पदार्थनां अपि स्वाभाविकं चित्रणं कृतमस्ति । तेन प्रकृतेः रूपद्वयं प्रतिपादितं कोमलं कठोरं च । यथा --

**"दृष्टिस्तृणीकुतजगत्त्रयसत्वसारा, धीरोद्धता नमयतीव गतिर्धरित्रीम् ।**
**कौमारकेऽपि गिरिवद् गुरूतां दधानो वीरो रस : किमयमंत्युत दर्प एव ।। (६/१९)**

एव प्रकारेण महाकविः भवभूतिः स्वकीयासु रचनासु उभयपक्षयोः भाव-कला च अपूर्वरूपेण समन्वयने उत्कृष्टं कवित्वं प्रकटयति । भवभूतिना उच्चकोटिकानां कालिदासादीनां महाकवीनां पङ्क्तौ विशिष्टं स्थानम् अधिगन्तुं योग्यः अस्ति । सः उत्कृष्टः नाट्यकारोऽस्ति न वा इत्यत्र कामं विवादः स्यात् स उत्कृष्टो महाकविः अस्ति इत्यत्र तु न कश्चन विवाद एव भवितुं शक्नोति । महाकविभवभूतिजन्मविषये मतैक्यं नास्ति जनाः, अस्मिन् विषये विविधकारकैः वचनैः समुद्भूयते यथा --

टीकाकारघनश्यामेन भवभूतिना द्राविड देशं मन्यते ।

डॉ. वासुदेवविष्णु मिराशी मते भवभूतेः जन्मः विदर्भदेशस्य अन्तर्गते पद्मपुरग्रामे अभवत् । यत् सम्प्रति ग्वालियरनगरस्य सन्निकटे अस्ति । तत्रैव अस्य स्मृतिरूपेण अधापि जीवाजीराव विश्वविधालयः प्रतिवर्षम भवभूतिसमारोह :, कालीदास सेस्कृत अकादमी सहयोगेन आमनन्ति ।

एम. जी. लेले मतानुसारेण भवभूतिना जन्मस्थलं ग्वालियर प्रदेशे 'पवाया' अथवा 'पोलवाया' ग्रामे अभवत् इति ।

किन्तु आधुनिकैः विद्वद्भिः भवभूतेः जन्मस्थलं गोदावरी तथा विन्ध्याचलसमीपे मन्यते । भवभूति जन्म स्थानविषये अद्यापि शङ्का- कलांङ्कावकाशः अवशिष्टो वर्तते इति ।